


# प्रकीर्णकोपनिषद्

આગમનો
એ અંશ
જે
સ્વયં છે
મૃત્યુંજય મંત્ર

पूजनीयश्रीपूर्वाचार्यो

श्रीप्रकीर्णकसूत्र समूहस्यं

ક્રમાંક:

सारसञ्चयरूपा

સ્થાન:

# प्रकीर्णकोपनिषद्

• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

પુસ્તકનું નામ : **પ્રકીર્ણકોપનિષદ્**
(શ્રી પયન્નાસૂત્રોનો સારસંચય)

મૂળ સૂત્રકાર : પૂજનીય શ્રીપૂર્વાચાર્યો

સંચય + સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી
**હેમચંદ્રસૂરીશ્વરજી** મહારાજાના
શિષ્ય પ.પૂ.આ.શ્રી
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀


### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com


---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी



## અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

## ● પ્રકાશકીય ●

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને... અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

લિ.

શ્રી જિનશાસન આરાધના ટ્રસ્ટ

ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા    શ્રી પુંડરીકભાઈ શાહ

શ્રી લલિતભાઈ કોઠારી    શ્રી વિનયચંદ્ર કોઠારી

# પૂર્ણ પીયૂષ

આરાધના, અધ્યાત્મ
અને આનંદનો અર્ક
એટલે
પયન્ના સૂત્રો.

પ્રત્યેક આત્મપ્રદેશને
પરાક્રમી બનાવી દેવા
સમર્થ છે
એનું પારાયણ.

સદ્‌ગતિ
ને પરમગતિનું
અવંધ્ય છે
આ આલંબન.

એ
મળી રહ્યું છે
આપણે ફળી જઈએ...

– આ. કલ્યાણબોધિસૂરિ

# અનુક્રમ


| ઉપનિષદ્ | પૃષ્ઠાંક |
|---|---|
| (૧) ચતુઃશરણ | ૧ |
| (૨) આતુરપ્રત્યાખ્યાન | ૨ |
| (૩) મહાપ્રત્યાખ્યાન | ૪ |
| (૪) સંસ્તારક | ૧૨ |
| (૫) ભક્તપરિજ્ઞા | ૨૧ |
| (૬) મરણસમાધિ | ૨૯ |
| (૭) ચન્દ્રવેધ્યક | ૪૩ |

अथ

# प्रकीर्णकोपनिषद्

## ॥ चतुःशरण - सारसञ्चयः ॥

अथ **चतुःशरणोपनिषद्**। चतुः-शरण-गमन-दुष्कृतगर्हा-सुकृतानुमोदना-रूपो गणो कर्त्तव्योमनवरतम्, कुशलहेतुत्वात्। उपैम्यहमर्हत्सिद्धसाधुजिनधर्म-**शरणम्**। **निन्दामि** मम निन्दादिपापानि। त्यक्तानि मया देहादिसर्वाधिकरणानि।

प्रतिक्रान्तोऽस्मि त्रिविधेन सर्वपापेभ्यः। शुभप्रवृत्तं तु देहादिकमनुमतं मम। त्रि-विधेना**नुमोदयामि** परमेष्ठिगुणान् श्राव-काणां धर्मकृत्यमन्येषां च भव्यानां मार्गा-नुसारिकृत्यम्। एतद्गणकर्त्ता सर्वदुःखा-न्यतिक्रम्य कल्याणं लभत इति।

## ॥ आतुरप्रत्याख्यान- सारसञ्चयः॥

अथ **आतुरप्रत्याख्यानोपनिषद्।** **पञ्चपरमेष्ठिनो** मम मङ्गलं देवताश्च। तान् कीर्त्तयित्वा पापं **व्युत्सृजामि**। **क्षमयाम्य**-र्हदादीन् चतुर्विधसङ्घं सर्वजीवांश्च।

**क्षमन्तु** मां सर्वजीवाः। सर्वजीवेषु मम **मैत्री**, न तु केनचिद् वैरम्।

यावज्जीवमष्टादशपापस्थानकानि त्रिविधं त्रिविधेन **प्रत्याख्यामि**। अर्हदादिसाक्षिकमतीतं निन्दामि, प्रत्युत्पन्नं संवरेमि, अनागतं च प्रत्याख्यामि।

इदमिष्टं शरीरमपि चरमोच्छ्वासनिःश्वासैर्यावज्जीवं **व्युत्सृजामीति** कृत्वा सम्यक् **सोढव्या** दिव्याद्युपसर्गाः।

आहारोपधिदेहपूर्वदुष्कृतानि चरमोच्छ्वासनिःश्वासैस्त्रिविधेन **व्युत्सृजामि**।

निराकारमिदं प्रत्याख्यानम्, कालपरि-माणेन तु तत् साकारं भवति। भावयितव्याऽ**नित्यादिभावनाः**। कर्त्तव्या पृथिव्यादिसर्वजीवैः सह मिथः **क्षमापना**। अदीनतया ध्येयमात्मन एकत्वम्, नित्यत्वम्, ज्ञानदर्शनलक्षणत्वं च। बाह्यभावा हि संयोगरूपाः, सर्वदुःखमूलभूताश्च, अतस्त्रिविधेन त्याज्येति।

## ॥ महाप्रत्याख्यान-सारसञ्चयः ॥

अथ **महाप्रत्याख्यानोपनिषद्**। तीर्थकरादिप्रणामं कृत्वा जिनमतश्रद्धान-

पुरस्सरं पापं **प्रत्याख्यामि**। **निन्दामि** सर्वभावेन दुष्कृतम्। निराकारं सर्वं सामायिकं त्रिविधेन करोमि। बाह्याभ्यन्तरोपधि-शरीर-भोजनादीनि त्रिविधेन **व्युत्सृजामि**, राग-द्वेष-हर्षादिदोषांश्च। **क्षमयामि** सर्व-सत्त्वान्, क्षमन्तु ते माम्।

एवमाश्रवान् व्युत्सृज्य समाधिं प्रतिसन्धयेत् - सर्वद्रव्येषु ममत्वं त्यजामि, ज्ञानादिरूप आत्मैव ममाऽऽलम्बनम्, अवशेषं व्युत्सृजामि। एकस्यैव जीवस्य जन्मादि, स्वकृतकर्मभोगः, परलोकगमनं च। संयोगमूला तद्दुःखपरम्परा, अतस्तं

व्युत्सृजामि, मिथ्यात्वाज्ञानममत्वादि-दोषांश्च। यत्स्थानेषु मम यदपराधान् जिना जानन्ति, सर्वभावेनोपस्थितोऽहं तानालोचयामि।

बालवन्निर्मायमालोचयेत्, ऋजुभूतस्यैव शुद्धिसम्भवात्, शुद्धस्यैव धर्मस्थितेः, सशल्यस्य सिद्ध्यभावाच्च। सबहुभावशल्यस्याप्यालोचका आराधकाः, अल्पमपि निह्नुवाना अनाराधकाः। शस्त्रादेरपि दारुणतरं भावशल्यम्, दुर्लभबोधिबीजतयाऽनन्तसंसारहेतुत्वात्। अतो गौरवरहिता श्रमणा मिथ्यादर्शनादिशल्यान्युद्धरन्ति,

ततोऽपि लघुका भवन्ति, अवतारितभर-पुरुषवत्। दशदोषविमुक्तमालोच्यानुसर्त्तव्यं गुरुदत्तं **प्रायश्चित्तम्**, अन्यथाऽनवस्था-प्रसक्तेः।

कान्तारादिष्वपि पालितमभग्नं व्रतं पालनाशुद्धम्। रागाद्यदूषितं तु भावविशुद्धम्।

अनन्तेऽस्मिन् संसारे पीतं जननी-दुग्धमश्रुजलं च सागरजलादप्यधिकम्। न स प्रदेशोऽपि लोके, यत्र न जन्ममृती, ८४ लक्षयोनिसु प्रत्येकमनन्तकृत्व उत्पत्तिश्च।

बहुबालमरणानि स्मृत्वा **पण्डितमरणेन मर्त्तव्यम्**।

अशरणमत्र मात्रादयः, प्रत्येकं पापविपाको भवसंसरणं च। अतः नरकादिचतुर्गतिकवेदनाः स्मृत्वा पण्डितमरणेन मर्त्तव्यम्, एकस्यापि तस्य बहुजन्मशतोच्छेदकत्वात्, तन्मृतस्य च सुमृतत्वात्।

सर्वपुद्गला बहुशोऽभ्याहृताः, न त्ववाप्ता तृप्तिः। सर्वनरकेष्वहमाहारनिमित्तं गतः। यथा तृणैरग्नेरतृप्तिः, एवं जीवस्याप्यर्थसारेण, भोजन-गन्ध-माल्य-रूप-

रस-स्पर्शैश्च। किञ्च न त्राणमात्मात्मनो भोजनादिभिः, दुर्गत्यवारकत्वात्तेषाम्।

क्रोधादिदोषान् त्यक्त्वा पञ्चसंवराद्याश्रितोऽहं **पञ्चमहाव्रतानि रक्षयामि**। गुप्ति-समितयो मम त्राण शरणं च। यदि सत्पुरुषा गिरिकन्दरादिगता अपि धृति-बद्धकक्षा आत्मार्थं साधयन्ति, ततोऽनगारसहायवता मधुरं जिनवचनं शृण्वता तत्साधनं कथं न शक्यम् ?

पूर्वमकारितयोगस्यात्मा मरणसमये विषयवशः परीषहपराजितश्च भवति, अतः

प्राग् योगे यतनीयम्।

तृणमयसंस्तारकः प्रासुकभूमिर्वाऽकारणम्, **विशुद्धमनस आत्मन एव संस्तारकभूतत्वात्**। पुरुषकारसहितो हि ज्ञानी कर्मक्षयकर्ता। बहुवर्षकोटिभिरज्ञानिना क्षपणीयं कर्म क्षपयति ज्ञान्युच्छ्वासमात्रेण।

अशक्यमन्तसमये सर्वद्वादशाङ्ग्यनुचिन्तनम्। वीतरागमत एकपदेऽपि संवेगकर्ताऽध्यात्मप्रयोगेण मोहजालं छिनत्ति। सर्वादरेण विरागे यतनीयम्। **ससंवेगी हि**

**मुच्यति**। इतरो ह्यनन्तशो म्रियते।

श्रमणोऽस्म्यहम्, सर्वत्र संयतश्च। यद्यज्जिनप्रतिक्रुष्टं तत्तदहं **व्युत्सृजामि**।

३२ योगसङ्ग्रहैः १२ तपोभिः संसाररङ्गे धृत्यादिवता मोहमल्लं हत्वा **हर्त्तव्याऽऽराधनापताका**। संस्तारकमारूढः पुरातनं कर्म क्षपयति, नवं च न बध्नाति। एवं सम्यक् कालं कृत्वोत्कृष्टतस्तृतीयभवे निर्वाणं लभत आराधनोपयुक्तः, सुविहितः। न चिन्त्यं 'चिरं जीवामि', 'क्षिप्रं वा म्रिय' इति,

यदीच्छा संसारतरणे।

दर्शन-ज्ञान-चरित्र-तपःसु चतुःस्कन्धाऽऽराधना। उत्कृष्टादिना सा त्रिविधा। उत्कृष्टया तद्भव एव सिद्धिः। जघन्यया सप्तमाष्टमभवे। धीरेणापि मर्त्तव्यम्, कातरेणापि, अतो **धीरतया मरणं वरम्**। सुविहित एतत् प्रत्याख्यानं सम्यगनुपालयित्वा वैमानिकदेवो वा भवेत् सिध्येद्वेति।

## ॥ संस्तारक - सारसञ्चयः ॥

अथ **संस्तारकोपनिषद्**। वीरजिनं नत्वा शृणुत संस्तारकनिबद्धां गुणपरि-

पाटिम्। एषैवाऽऽराधना सुविहितानां मनोरथश्च, यदन्ते पताकाहरणम्। **कल्याणरूपमभ्युदयरूपं च पण्डितमरणम्,** यद् ३२ देवेन्द्रा अप्येकमनस्तया ध्यायन्ति। सितकमलादिमङ्गलानामपि **प्रथमं मङ्गलं संस्तारकः**। यथा ध्यानानां शुक्लं प्रधानम्। तथा सुविहितानां संस्तारकः। अतः प्राप्ता त्वया कल्याणपरम्परा। अवाप्ता ज्ञानादिरत्नमाला। लब्धो जिनवचनामृत-विभूषितो देहः।

**सुविहितगुणविस्तारो हि संस्तारकः**। एतस्मिन् तीर्थे स्नाता मुनिवराः प्राप्ता

अनुत्तरं निर्वाणम्। अत्र ह्याश्रव-संवर-निर्जरालक्षणा-स्त्रयोऽप्यर्थाः समाहिताः। अत्र च तीर्थे शीलव्रतबद्धसोपानाः। उत्तम-संयमबलेन संयुक्ताः परीषहसेनां भङ्क्त्वा कर्मरहिता अनुत्तरराज्यं निर्वाणं भुञ्जते।

सुविहितपरमार्थनिस्तारः खलु संस्ता-रकः। यच्चिन्तने मुञ्चन्ति देवा अप्या-सनशयनानि।

यस्य हि योगहानिः, जरा-विविध-रोगोदयश्च, तस्य संस्तारकमारोहयतः सु-विशुद्धः संस्तारकः। एवं कृतालोचनस्य

विशुद्धदर्शनचारित्रस्य रागादिरहितस्य त्रि-गुप्तिगुप्तस्य शल्यमदकषायविकथाभय-रहितस्य पञ्चमहाव्रतसमितिकलितस्य षट्-कायप्रतिविरतस्याष्टकर्मक्षपणोद्यतस्य नव-ब्रह्मगुप्तियुतस्य दशश्रमणधर्मोद्यतस्य सं-स्तारकमारोहयतः **सुविशुद्धः संस्तारकः**।

गौरवमत्तस्याऽऽलोचनां कर्त्तुमनि-च्छतो मलिनदर्शनस्य शिथिलचारित्रस्य **त्वविशुद्धः संस्तारकः**।

उत्तमार्थयुतस्य कषाय-विकार-रहितस्य प्रथमदिवसेऽपि संस्तारकगतस्य

यो लाभः, सोऽप्यनर्घ्यः। यः सङ्ख्येय-भवस्थितिः कर्म क्षपयति, तत् सर्वमप्येषो-**ऽनुसमयं क्षपयति**। किञ्चैष भ्रष्ट-राग-मदमोहो यन्मुक्तिसुखमाप्नोति तत् सुखं चक्रिणोऽपि न। न हि नाटकप्रेक्षणेऽपि सा रतिर्या महार्थविस्तारे हेतुसहस्रोपगूढतया विशाले जिनवचने।

न हि वर्षाण्यत्र गण्यन्ते, अपि त्वाराधना। बहवो गच्छ उषिता अपि जन्ममरणमग्नाः। पश्चादपि प्रव्रजिता ये संस्तारकमारुढा म्रियन्ते, ते क्षिप्रमप्या-**त्मपथ्यं** करिष्यन्ति।

यो यथाख्यातो विहाराभ्युद्यतस्तपस्वी च तस्य नित्यमपि भावोद्यतस्य यत्र तत्रापि नित्यमपि भावोद्यतस्य यत्र तत्रापि संस्तारकः। वर्षारात्रे विचित्रतपांसि सुष्ठु कृत्वा हेमन्ते सर्वसत्त्वेन संस्तारकमारोहयति।

**भावयितव्यानि महासत्त्वनिदर्शनानि**, तद्यथा- अर्णिकापुत्राऽऽचार्यः, ४९९ स्कन्धकसूरिशिष्याः, दण्डमुनिः, (शरसंवेधसहनम्), सुकोशलमुनिः, अवन्तिसुकुमालमुनिः, कार्त्तिकाऽऽर्यः (शक्तिप्रहारोपसर्गतितिक्षा), धर्मसिंहमुनिः (गृध्र-

पृष्ठप्रत्याख्यानम्), चाणक्यमुनिः (दाहसहनम्), अमृतघोषराजर्षिः (देहछेदनाध्यासनम्), ३२ ललितघटाः (नदीपूरप्लावनसहनम्), ऋषभसेनाचार्यः (दाहवेदनातितिक्षा), कुरुदत्तकुमारः (अग्न्युपद्रवसहनम्), चिलातिपुत्रः, गजसुकुमालः, गोशालकतेजोलेश्यादग्धमुनिद्वयं च।

एतद् भावयित्वा त्रिगुप्तो यावज्जीवं गुरुनियोगेन साकारं सर्वमाहारं **प्रत्याख्याति**। यद्वा समाध्यर्थं पानकाहारं करोति, यथाकालं पश्चात् तमपि त्यजति।

कुर्यात् सर्वसङ्घसर्वजीव**क्षमापनाम्**।

स्मृतिगोचरमानयेदनन्तकालं यावत् सोढं दारुणं नरकादिदुःखम्। नास्ति मरणसमं भयम्, जन्मसमं च दुःखम्। **शरीरममत्वमेव जन्ममरणाऽऽतङ्कम्,** अतस्तत् छिन्धि। किञ्च संसारस्थसर्व-शारीरमानसदुःखान्यनन्तकृत्वो जीवेन शरीरममत्वेन प्राप्तानि। अतः छेद्यं तदुत्त-मार्थेच्छुना। निश्चेतव्यं च तदर्थम्, यथा-अन्यदिदं शरीरम्, जीवश्चान्यः - इति।

क्षामितातिचारोऽ**नुत्तरतपःसमाधि**-

मारूढो बहुभवबाधाकरं कर्म प्रस्फोटयति। असङ्ख्येयाशुभभवलक्षकोटिभिरपि बद्धमशुभं कर्म संस्तारकमारोहयन्नैकसमयेन विधुनाति। **जीवशरीरभेद**ज्ञाः सुविहिता धर्मार्थं शरीरमपि त्यजन्ति।

समस्तेऽपि लोके दुर्लभतरो मुकुटभूतश्च सुविशुद्धः सङ्घः। ग्रीष्मे सूर्यचन्द्रप्रचण्डकिरणसहस्रप्रपाते कालशिलायां दह्यमानोऽपि यो ध्यानोपयोगचित्तः परिशुद्धज्ञानदर्शनविभूतिमान् लोकविजयकर्ता लभते **चन्द्रकवेधम्**, य उत्तमलेश्यानुगतः प्रतिपन्न उत्तमार्थमिति।

॥ २० ॥

## ॥ भक्तपरिज्ञा-सारसञ्चयः ॥

अथ भक्तपरिज्ञोपनिषद्।

वीराय नमः। जयति जिनशासनम्। अपवर्गसुखमेव बुधस्पृह्यम्, शेषसुखस्य कल्ये स्मृतिशेषत्वगमनात्। किञ्च नर-देवेन्द्रसुखं दुःखमेव परमार्थतः परमार्थदारुणं च। अतो जिनाज्ञाऽऽराधने यतितव्यम्, तस्यैव शश्वत्सुखसाधनत्वात्।

अविकलाराधनाप्राप्तिर्ह्यभ्युद्यतमरणेन, तच्च त्रिविधम् - **भक्तपरिज्ञाइङ्गिनी, पादपोपगमनम्**।

**भक्तपरिज्ञा** - द्विविधम् (१) **सविचारम्**- सपराक्रमस्य संलिखित-तनोर्मुनेः (२) **अविचारम्** - अपराक्रमस्य कालेऽप्रभवतः।

धृतिबलविकलानामकालमृत्युकलितानामकृतकरणानामद्यकालीनयतीनां योग्यं निरवद्यं निरुपसर्गं चेदं मरणम्।

**भक्तपरिज्ञाया योग्यः** - प्रशमसुखपिपासुः शोकहास्यविषयसुखरागरहितः स्वजीवितस्पृहाशून्यो धर्मोद्यमजातसंवेगो निश्चितमरणावस्थो ज्ञातसंसारनैर्गुण्यो यति-

गृहस्थो वा।

अनुशयी प्रियधर्मो दोषदूषणसतृष्णः सदोषोऽपि च पार्श्वस्थादिः।

एवंविधस्य भक्तपरिज्ञेच्छोर्भणति गुरुः - आलोचन-व्रत-क्षमापनापुरस्सरं तां प्रतिपद्यस्व - इति। ततः स बालवत् **सम्यगालोच्य प्रायश्चित्त**मुरीकरोति।.

ततो **महाव्रतोपस्थापना**। अखण्ड-महाव्रतस्याप्यर्हत्युपस्थापना। यथा भृत्या विधिना स्वाम्याज्ञां प्रत्यर्पयन्ति, एवमेषा गुरुणो यावज्जीवप्रतिज्ञाऽऽज्ञाया अपि

प्रत्यर्पणमेतत्। सातिचारचरणस्य खण्डितव्रतस्य वाऽपि सम्यगुपस्थितस्योपस्थापना भणिता। देशविरतस्य त्वणु**व्रतारोपणम्**। सर्वविरतीच्छोस्तु योग्यस्य तस्य **सर्वविरतिसामायिकारोपणम्**।

ततस्तेन भक्तपरिज्ञाप्रत्याख्यानं याचितेन गुरुणा **दिव्येन निमित्तेनालोचयितव्यम्**, अपरथा दोषप्रसक्तेः।

दर्शयेत्तस्योत्कृष्टसर्वद्रव्याणि। तानि दृष्ट्वा मन्यते कश्चित् - किं तीरप्राप्तस्य ममैभिः ? - इति। कश्चित्तु तद्देशं भुक्त्वा

संवेगगतश्चिन्तयति-किं मया नोपभुक्तम् ? - इति।

उदरमलशोधनार्थं मनोज्ञ**समाधिपानं** तस्य दातव्यम्, मन्दविरेचनं च। समाधिपानं नागकेसरतमालपत्र- शर्करादियुतं क्वथितशीतलदुग्धम्। फोप्फलादिद्रव्यै-**र्मधुरविरेचनम्**। निर्वापितोदराग्नेः सुखमेव समाध्यधिगमः।

सूरिज्ञापितसङ्घेन क्षपकस्य निरुपसर्गप्रत्यय**व्युत्सर्गकरणम्**। सङ्घमध्ये चैत्यवन्दनपूर्वं विधिना **चतुर्विधाहार-**

**प्रत्याख्यानम्**, समाध्यर्थं वा साकारं त्रिविधाऽऽहारप्रत्याख्यानम्, पश्चाच्च यथाकालं पानकस्यापि त्यागः। **सङ्घ-क्षमापना**।

मिथ्यात्वच्छेद-वीतरागभक्ति-स्वाध्यायादिगोचरा **सूरेरनुशास्तिः**, सम्यग्दर्शन-पञ्चमहाव्रतदार्ढ्योपदेशः, हिंसादि-दोष-रागद्वेषमोहप्रत्यपायप्रकटनम्।

कथनञ्च, यथा-दुःखक्षयः, कर्मक्षयः, समाधिमरणं बोधिलाभश्च, एतस्मादन्यन्न प्रार्थनीयम्। अतस्त्याज्यं निदानशल्यम्।

अपास्या विषयापेक्षा। कर्त्तव्यः कषाय-निग्रहः।

एवं गुरूपदेशामृतपरितृप्तोऽसौ वदति-इच्छाम्यनुशास्तिम् - इति। यद्यशुभ-कर्मोदयेन तद्देहे वेदना सम्भवेत्, तृष्णादिपरीषहोदयो वा, तदा मधुरवचसा स वाच्यः - स्मर सुजन ! चतुर्विधसङ्घमध्ये गृहीतां महाप्रतिज्ञाम्, यथा - आराधयिष्याम्यहम् - इति। को नाम भनक्त्य-र्हदादिसाक्षिकं गृहीतं प्रत्याख्यानम् ? अतो विचिन्तयावन्तिसुकुमालादिमहापुरुषनिदर्शनम्। त्वमपि तद्वत् सत्त्वमवलम्ब्य धीरत्वं कुरु,

भवनैर्गुण्यं च भावय, यथा जन्म-जरा-मरणजलो रौद्रोऽयं भवसमुद्रः।

अपि च धन्यस्त्वं येनात्र भवलक्ष-दुर्लभं लब्धं सद्धर्मयानम्। चिन्तामण्याद्यु-पमस्यैतस्य प्रभावेन जीवा जन्मान्तरेऽपि न प्राप्नुवन्ति दुःख-दौर्गत्यम् - इति।

एवं सद्भावभावितस्य पञ्चनमस्कार-समं विसर्जितप्राणस्य परिणामविशुद्धस्य क्षपकस्य जघन्येन **सौधर्म** उत्पादो भवति। उत्कृष्टेन गृहस्थो**ऽच्युतकल्पम्**, मुनिस्तु **सिद्धिं सर्वार्थसिद्धिं** वा व्रजति।

धन्याः पठन-श्रवण-भावनानि कुर्वन्ति **योगीश्वरजिनवीरभद्र**भणिताया अस्या भक्तपरिज्ञाया इति।

## ॥ मरणसमाधि - सारसञ्चयः ॥

अथ **मरणसमाध्युपनिषद्**। विनीत-शिष्येण पृष्टः श्रुतजलधिपारगो वाचकः समासतो **मरणसमाधि**माह सम्यक्त्व-ज्ञानचारित्रैस्त्रिविधाऽऽराधना। जिनाज्ञया जीवाजीवश्रद्धानमर्हदादिभक्तिश्च सम्य-क्त्वाराधना, ययाऽवाप्यते परित्तसंसारि-त्वम्। तद्श्रद्धानेन ह्यतीतकालेऽनन्त-

मरणानि। कांस्य-शङ्खादितुल्यैरप्रमत्तैर्यै-श्चारित्रमाराधितं त एकं पण्डिमरणं मृत्वा पुनर्बहुमरणानि न म्रियन्ते। एकमात्मानं ज्ञात्वाऽऽत्महितं च कृत्वा प्रवर-ज्ञान-दर्शन-चारित्रतपः सुस्थिता भवन्ति। इहलोकपरलोकयोर्जीवितमरणयोश्च निरा-शंसाः। एवं त्र्यादिशुभस्थानसंस्थितास्तदि-तरेषु त्वसंस्थिता योगेषु क्लाम्यन्तः शरीरसङ्कल्पवहनासमर्थाः पापभीरवोऽ-भ्युद्यतं मरणमुपयन्ति। सुकरणो महर्षिस्त्रि-करणाऽऽराधको ध्रुवं भवति, अथ स उत्तरार्थं लभते सोऽतिलाभः।

॥ ३० ॥

पण्डिमरणार्थं सर्वामपि सुखशीलतां त्यक्त्वा चारित्रस्पर्शः कर्त्तव्यः। इन्द्रियाणि कषायान् गौरवान् रागद्वेषौ च जित्वाऽऽराधनाशुद्धिः कार्या। दर्शन-ज्ञान-चारित्र-गोचरसर्वातिचाराऽऽलोचना विधेयाः। कण्टकविद्धस्य हि सर्वाङ्वेदनोदयः, तदुद्धारे तु निर्वृतिः, एवं दोषशल्यमाश्रित्यापि ज्ञातव्यम्। सशल्यमरणं हि भवभ्रमणहेतुः।

ध्यानसंवररहित सुचिर सङ्क्लिष्टविहारार्जितपापमपि संवरयुतो ज्ञान्यहोरात्रमात्रेणापनयति। सुबहुनाऽपि कालेनासंवृतो

यत् कर्म निर्जरयति, तत् संवृत उच्छ्वासमात्रेण। श्रुतचारित्रोभयसम्पन्नो हि साधुर्दुःखक्षयकरः। **सङ्क्लिष्टाः कन्दर्पाद्याः पञ्च भावना** आराधकेन नित्यं वर्जनीयाः। तत्र (१) कन्दर्प-कुत्कुचद्रुतशील-नित्यहास्यकथपरविस्मापकाः **कन्दर्पभावनाकृतः**। (२) ज्ञान-केवलि-धर्माचार्य-सङ्घ-साधूनाम-वर्णवादी मायी **किल्बिषिकभावनाकृत्**। (३) सातर-सद्ध्यर्थं मन्त्राभियोग-कौतुकभूतिकर्मकारी **अभियोगभावनाकृत्**। (४) अनुबद्ध-रोष-व्युद्ग्रहः संसक्तो निमित्तप्रतिसेवी च

**आसुरीभावनाकृत्**। (५) उन्मार्गदेशको ज्ञानदूषको मार्गविप्रणाशकृन् मोहेन मोहयंश्च **सम्मोहभावनाकृत्**।

एतद्भावनास्त्यक्त्वा विशुद्धभावनायां रन्तव्यम्।

कामसक्ता अबुधा दीक्षां मलिनीकुर्वन्तो मोहमहासागराभिहता अप्रतिक्रान्ता **बालमरणानि** म्रियन्ते। ये तु मोहं मुक्त्वा गुरुसमीप आलोच्य निःशल्या म्रियन्ते, तेऽप्याराधकाः।

मरणविधौ १४ स्थानकानि - (१)

**आलोचनादि** ये ३६ स्थानेषु प्रवचनसार-सम्पन्नास्तत्समीपे व्रतषट्कादिगोचरमालि-न्यशोधिः कर्त्तव्या। आचारवत्त्वादिगुण-सम्पन्नो ह्यालोचनागुरुः। सूक्ष्ममपि भाव-शल्यं लज्जया गौरवेण वाऽनालोच्य कालं कुर्वाणोऽनाराधकः, इतरस्त्वाराधकः। अतो रागादिना भय-हास्य-प्रमाद-रोग-पराभियोगादिना वा यत् किञ्चित् प्रति-सेवितं तदाकम्पनादि-१०-दोषान् विमुच्य यथार्थ**मालोचनीयम्**।

ततः पर्याय-बल-आगम-काल-

कालकरण-पुरुष-जीत-क्षेत्र-प्रतिषेवण-विधीन् पर्यालोच्याचार्याः कथयन्ति तं योग्यं **प्रायश्चितम्**, उपदिशन्ति च **ज्ञाना-द्यप्रमादम्**।

(२) **संलेखनादि- बाह्या** संलेखना शरीरे। **आभ्यन्तरा** कषाये। मित-विरस-रूक्षान्नपानेनोद्गमादिशुद्धेन दुर्बलं कुर्वा-त्मानम्। विविधैषणाभिरुग्रैरभिग्रहैश्च संय-ममविराधयन् यथाबलं शरीरं संलेखय। **अनुक्रमेणापवर्त्तयाऽऽहारम्**।

जघन्या संलेखना ६ मासाः, उत्कृष्ट

१२ वर्षाणि। तत्राप्याचामाम्लमुत्कृष्टम्। षष्ठाष्टमदशमद्वादशादिभक्ततपांसि कृत्वा विधिना मित-लघुकाऽऽहारेणाऽऽचामाम्लं कुरुष्व। न चैतद्विधं स्पृशता क्षणमप्य-**ध्यवसानविशुद्धौ** प्रमादः कर्त्तव्यः, तद्वि-कलानां विकृष्टतपसोऽपि विफलत्वात्।

क्षमादिना क्रोधादिकषाया जेयाः। त्याज्यौ च रागद्वेषौ, तयोरेव सर्वसुख-प्रतिबन्धकत्वात्।

कृतसंलेखनसाधु**र्निर्यापकान् मार्ग-येत्**। ते च श्रुतशीलसम्पन्ना मरणसमाधि-

कुशला व्यवहारविधिज्ञा अभ्युद्यतमरणसारथय उपदेशादिपटवश्चतुर्बुद्धियुता एवमादिगुणोपेता भवन्ति।

द्वयोराचार्ययोर्वैयावृत्यकरद्वयम्। यद्वा तपस्विनः पानकवैयावृत्ये द्वयम्। उद्वर्त्तनाद्यर्थं उच्चारादिकरणयोगेषु च द्वयमशून्यकरणे जघन्येन। द्वादशाङ्गीश्रुतसारथीनां कल्पाकल्पविधिज्ञानां प्रायश्चित्तविशारदानां धीराणामेतादृशानां सूरीणां समीपे श्रमणोऽभ्युद्यतमरणं प्रपद्येत।

(३) **क्षमापना** - आचार्यादिः श्रमण-सङ्घस्य च कर्त्तव्या। (४) **कालः** (तत्प-र्यालोचनम्) (५) **व्युत्सर्गः** - (निरूप-सर्गप्रत्ययं सङ्घेन तत्करणम्।) (६) **अवकाशः** (७) **संस्तारकः** - आकर-समुत्थित - निश्छिद्रतृणादौ काष्ठ-शिला-फलके सुखप्रतिलेख्ये यतिप्रशस्ते उत्तर/पूर्वशिराः संस्तारकः कर्त्तव्यः। युक्ते प्रमाणोपेते विधिविहित उभयकालप्रति-लेखनाशुद्धे तत्र संस्तारके त्रिगुप्तेन श्रमणेनाऽऽरोहणं कार्यम्। (८) **निःसर्गः** - द्रव्य-पर्याय-क्षेत्र-कालेषु सर्वेषु चतुर्विध/

त्रिविधाहारप्रत्याख्यानम्, पश्चात् पानकाहारस्यापि व्युत्सर्गः।

(९) **वैराग्यम्** - कथयति तस्य निर्यापको मधुरकथाम्। दर्शयति माया-निदान-मिथ्यात्वशल्यकृतानैहिकाद्यपायान्, बालमरणेऽपायम्, इतर चोपायम्। कथयति च - यथा सशल्याः सगौरवा इन्द्रियकषायवशाश्चासमाधिना म्रियन्ते, यथा च सुसमाधिमरणेन केचित् सिद्धिमुपयान्ति।

किञ्चापनयति तस्य देहममत्वं विराग-

वाक्यैः, स्मारयति चतुर्गतिकदुःखम्, उत्साहयति परीषहोपसर्गतितिक्षार्थम्, कथयति सनत्कुमारराजर्षिप्रभृत्युत्तम-पुरुषनिदर्शनानि, भक्तपरिज्ञाकृद्बानरादि-दृष्टान्तानि च।

(१०) **मोक्षार्थम्** (उत्साहनम्) (११) **ध्यानविशेषः**(तच्छुद्धिसम्पादनम्) (१२) **लेश्या** - (तद्विशुद्धिकरणम्) (१३) **सम्यक्त्वम्** - (तन्निश्चलीकरणम्।)

(१४) **पादपोपगमनम्** - संहनन-धृतियुतो नव/दशपूर्वी/अङ्गधरो वा

इङ्गिनीं पादपोपगमनं वा प्रतिपद्यते।

यथा समे विषमे वा पतितः पादपो निश्चलो निष्प्रतिकर्म एवास्ते तथा भवति पादपोपगतः श्रमणः। नवरं परप्रयोगात् कम्पेतासौ, तरुवदेव।

तत्र शुद्धस्थण्डिल एकान्ते निर्दोषे चाभ्युद्यतमरणमुपैति। पूर्वभववैरिको देवः कदाचित् पाताले संहरेत्, मा भूत्तस्य वेदनाविरह इति। एवं दिव्याद्युपसर्गे उत्पन्ने सम्यक् सहतेऽसौ। भावयत्यसिकोषभेदवज्जीवशरीरान्यत्वम्। मेरुवन्निश्चलो भवति

ध्याने।

तीर्थकरादिभिः सेवितमिदम्। सर्वेऽपि तीर्थकराः पादपोपगमनेन सिद्धिं गताः। शेषास्त्वनगाराः त्रिकालेऽपि पादपोपगताः। भक्तप्रत्याख्यानिनः। इङ्गिनीगताः। सर्वा आप्यार्या देशविरताश्च प्रत्याख्यानेन म्रियन्ते।

कथयति निर्यापको पूर्वमहर्षिपरा-क्रमम्, उपसर्गेषु चिन्तनीयानि स्वसोढानि दुःखानि, अनित्यादिभावनानिरूपणम्, सर्वदुःखप्रतिपक्ष-आत्यन्तिकसुखोपेत-

मोक्षस्वरूपं, पण्डितमरणोपादेयतां चेति मरणसमाध्युपनिषद्।

## ॥ चन्द्रवेध्यक-सारसञ्चयः ॥

अथ **चन्द्रवेध्यकोपनिषद्**। जिनेभ्यो नमः। मोक्षमार्गसूत्रस्यायं महान् निष्यन्दः। वक्ष्येऽत्र (१) विनयम् (२) आचार्यगुणान् (३) शिष्यगुणान् (४) विनयनिग्रहगुणान् (५) ज्ञानगुणान् (६) चरणगुणान् (७) मरणगुणान्।

(१) **विनयः** - विद्याचार्यं परिभवतः दुःखेन गृहीताऽपि विद्या विफला स्यात्।

गुरुकर्मा सः। न लभते कीर्तिम्। नश्यत्यविनीतस्य सुशिक्षिताऽपि विद्या। कथञ्चिन्न नश्यति, तदापि न गुणदा भवति।

अतो न दातव्याऽविनीतस्य विद्या। विद्याया आचार्यस्य च परिभवकृत्त्वात्तस्य। विद्यां परिभवनाचार्यगुणानामप्रकाशकश्च मिथ्यात्वसंयुत ऋषिघातकानां लोकं व्रजति। यथाऽसदृशपतिं प्राप्ता कुलजा कन्या, तथा सुभगपुरुषेण गृहीता विद्याऽपि बलवती भवति।

अलं दुर्विनीतस्य विद्यया। विनयमेव

तावत् शिक्षत्वसौ। तुष्टगुरुजनोपदिष्ट-विनयशिक्षित-विद्यानां फलमनुभवितुं शक्यम्। समस्तविद्यानां दायका आचार्या दुर्लभाः। ऋजुका अक्लाम्यन्तः अपगत-चतुःकषायाः शिष्या अपि दुर्लभाः। विनयज्ञा अपि केचिद्रागाद्यभिभवेन विनय-प्रयोगं नेच्छन्ति। विनीतस्य दान्तस्याभण-तोऽपि लोके प्रसरति यशः।

(२) **आचार्यगुणाः** - व्यवहार-देशकाः, श्रुतरत्नसुसार्थवाहाः, पृथ्वीव-सर्वसहाः, मेरुवदकम्पाः, धर्मैकस्थिताः, चन्द्रवत् सोमलेश्याः, अपरिस्राविणः,

आलोचनार्हाः, हेतुकारणविधिज्ञाः, गम्भीराः, दुर्द्धर्षाः, कालज्ञाः, देशज्ञाः, भावज्ञाः, अत्वरन्तः, असम्भ्रान्ताः, अनुवर्त्तकाः, अमायिनः, स्वपरसमयज्ञाः, द्वादशाङ्गीलब्धार्थगृहीतार्थाश्च भवन्त्याचार्याः।

दीपसमा ह्याचार्या दीपयन्त्यात्मानं परं च। धन्यास्ते ये नित्यमादित्यचन्द्रभूतानां संसारमहार्णवतारकानां प्रणिपतन्ति पादान्। इह कीर्तिः सद्देवगतिरनुत्तरधर्मबोधिश्चाचार्यस्मरणे मुञ्चन्त्यासनशयनानि, आगच्छन्ति च वन्दनार्थम्।

षष्ठादितपोनिरता अपि गुरुवचोऽकुर्वन्तोऽनन्तसंसारिणः।

(३) **शिष्यगुणाः** - नीचैर्वृत्तिः, विनीतः, अमत्तः, गुणज्ञः, सुजनः, आचार्यमतिज्ञः, शीतादिक्षुधादिसहः, पृथ्वीव सर्वसहः, लाभालाभेषु समभावः, अल्पेच्छः, सन्तुष्टः, षड्विधविनयविधिज्ञः, गौरवरहितः, आत्महितरुचिः, दशविधवैयावृत्योद्युक्तः, स्वाध्याय-सर्वावश्यकयुतः, आचार्यवर्णवादी, गणसेवी, कीर्त्तिवर्द्धनः, धृतिबद्धकक्षश्च शिष्यः प्रशंस्यते।

सर्वमानं हत्वा शिष्यो भूत्वा तावत् शिक्षस्व। शिष्यस्य शिष्या भवन्ति, नाशिष्यस्य। निःश्रेयसमिच्छता शिष्येण सुकटुकान्यप्याचार्यवचनानि विसोढव्यानि।

जात्यादियुतः, बलवीर्यसमस्तसत्त्व-युतः, मृदुभाषी, अपिशुनः, अलोभः, प्रतिपूर्णपाणिपादः, अनुलोमः, स्निग्धोप-चितशरीरः, गम्भीरतुङ्गनासः, उदारदृष्टिः, विशालाक्षः, जिनशासनानुरक्तः, गुरुजन-मुखप्रेक्षकः, धीरः, श्रद्धागुणप्रतिपूर्णः, विकारविरतः, विनयमूलः, कालादिज्ञः, लोभभयमोहरहितः, जितनिद्रापरीषहश्च

भवति शिष्यः।

शुचिमनुरक्तं नित्यं विनयोपचारसंयुत-मार्जवगुणयुतं प्रवचनशोभाकरं धीरं वाचयेत्। तदितरं तु पुत्रमपि न। एषा शिष्य-परीक्षा पारत्वमिच्छताऽवश्यं कर्त्तव्या।

(४) **विनयनिग्रहगुणाः** - मोक्षद्वारं विनयः।

अल्पश्रुतोऽपि पुरुषो विनयेन कर्माणि क्षपयति। गुणरहितो विनयरहितश्चारित्रयोगैः पार्श्वस्थश्च सुबहुश्रुतोऽपि पुरषोऽल्पश्रुतः। तदितरस्त्वल्पश्रुतोऽपि बहुश्रुतः।

सम्यक्त्वे ज्ञानमायत्तम्, चारित्रे दर्शनम्, क्षान्तिबलात् तपः, नियमविशेषश्च विनयात्। विनयाद्विना सर्वेऽपि तपःप्रभृतयो निरर्थकाः।

जिनैः प्रथमं मोक्षमार्गे विनय एव नित्यं प्ररूपितः। यो विनयस्तज्ज्ञानम्, यज्ज्ञानं तदुच्यते विनयः। विनयेन ज्ञानं लभते, ज्ञानेन च विजानाति विनयम्। मनुष्याणां सर्वश्चारित्रसारो विनये प्रतिष्ठितः। सुबहुश्रुतोऽपि मन्दश्रद्धासंवेगो योऽविनीतः, स चारित्रं नाराधयति, चारित्रभ्रष्टश्च भ्राम्यति।

स्तोकश्रुतेनापि सन्तुष्टो यो विनय-करणोद्युक्तः, पञ्चमहाव्रतयुक्तो गुप्त आराधको भवति। विनयरहितस्य तु सबह्वपि श्रुतमधीतं व्यर्थम्, अन्धस्य दीपलक्षकोटिवत्।

(५) **ज्ञानगुणाः** - ज्ञानिनश्चारित्र-मन्तश्च ये पुरषास्ते धन्याः। शक्यस्त्रैलोक्या-वगमः श्रुतज्ञानात्। बन्धादिज्ञापकत्वेन ज्ञानं चरणहेतुः। द्वयं हि धर्मसाधनम् - दोष-विवर्जनम्, गुणसेवनं च। ज्ञानसिद्ध-मेतद्द्वयम्। ज्ञानेन विना करणं न, करणेन विना न तारकं ज्ञानम्। करणस्थितो ज्ञानी

भवसंसारसमुद्रं तरति। यथा शस्त्रेण विना योधः, योधेन विना च शस्त्रम्, तथा ज्ञानेन विना करणम्, करणेन विना च ज्ञानम्। नादर्शनस्य ज्ञानम्, ज्ञानेन विना न करणगुणाः, नागुणस्य मोक्षः, नामोक्षस्य निर्वाणम्।

यज् ज्ञानं तत् करणम्, यत् करणं स प्रवचनस्य सारः, स एव च परमार्थः। ज्ञानं प्रकाशकम्, तपः शोधकः, संयमश्च गुप्तिधरः, त्रयस्यापि समायोगे मोक्षो जिनशासने भणितः। यथा चन्द्राज् ज्योत्स्ना, तथा बहुश्रुतमुखाज्जिनवचनं

निःसरति, यच्छ्रुत्वा मनुष्याः संसारं तरन्ति।

यथा ससूत्रा सूचिः कचवरे पतिताऽपि न नश्यति, तथा ससूत्रो जीवः संसारे गतोऽपि न नश्यति। आगमेन ज्ञानी जानाति चारित्रशुद्धिम्। अतोऽर्थयुते जिनोक्तज्ञाने मोक्षकामिना यत्नः कर्त्तव्यः। स्वाध्यायसमं तपो नास्ति, नापि भविष्यति। स्वाध्याये-ऽसङ्ख्यभवार्जितमपि कर्मानुसमयं क्षप-यति। एकस्मिनपि यत्र पदे नरोऽभीक्ष्णं संवेगं व्रजति, तत्तस्य ज्ञानम्, येन विरागत्वमुपैति, न तत् पदं मरणान्तेऽपि

मोक्तव्यम्, तेन हि सोऽध्यात्मयोगैर्मोहजालं क्षपयति।

(६) **चारित्रगुणाः** - ते धन्याः, ये जिनोक्तधर्मं प्रयत्नेन चरित्वा सर्वभावेन गृहपाशबन्धादुन्मुक्ताः। ये नरा भावेनानन्य-मनसो येऽनुसरन्ति जिनवचः, ते मरणकाले न विषीदन्ति। ये भावेनानन्यमनसः प्रेत्यहितं गवेषयन्ति, ते दृढधियो दुःखानां पारं गच्छन्ति। मानुष्यम्, बोधिः, श्रामण्यम्, ज्ञानाभिगमः, चारित्रशुद्धिः, एतदुत्तरोत्तरं दुर्लभतरम्।

सम्भवत्यचारित्रस्य सम्यक्त्वम्, श्रेणिकादिवत्। चारित्रवतस्तु नियमेन सम्यक्त्वम्। चारित्राद् भ्रष्टेन दर्शनं सुष्ठुतरं ग्रहीतव्यम्, चरणरहिताः सिध्यन्ति, न दर्शनरहिताः। यस्य मतिः पञ्चसमितित्रि-गुप्तिभिरविरहिता, यश्च न करोति रागद्वेषौ, तस्य चारित्रं शुद्धं भवति।

(७) **मरणगुणाः** - पुरुषस्तुरगश्च यथाऽनियमितकरणयोगतया परानीकं दृष्ट्वा भज्येते सङ्ग्रामे। एवमकारितयोगः पुरुषोऽपि मरण उपस्थिते सति परीषहसहो

न भवति। इतरस्तु भवति, यतः स मरण उपस्थिते निश्चयपरशुप्रहारेण परीषहचमूं छिनत्ति।

अकृतपरिकर्मतया क्लीब आराधना-काले मुह्यति। बाधन्ते तस्येन्द्रियाणि आगमसंयुतस्यापीन्द्रियविषयलोलुपस्य प्रायः समाध्यसम्भवः। अल्पश्रुतोऽपि सुकृतपरिकर्मतयाऽव्यथितः सुखं संयम-मरणप्रतिज्ञं समानयति। एवञ्चात्मशिक्षां ध्यायन् स चन्द्रकवेध्यं विध्यति। एतदर्थं नित्यमप्रमादिनाऽऽत्मा मोक्षमार्गेऽविराधि-तगुणः कर्त्तव्यः।

॥ ५६ ॥

सम्यक्त्वनिर्मलमतेश्चरमसमये वर्त्त-मानस्याऽऽलोचितनिन्दितगर्हितवतो मरणं शुद्धं भवति। परकषायैरुदीर्यमाणा अपि धन्यानां कषायाः समुत्थातुं नेच्छन्ति, सुनिविष्टपङ्गुलवत्। यस्य तु कषाया उत्कटा भवन्ति, तस्य श्रामण्यं विफलम्, इक्षुपुष्पवत्। देशोनपूर्वकोट्याऽप्यर्जितं चरितं कषायितचित्तेन मुहूर्त्तेनैव हार्यते। अनन्तकालं प्रमाददोषेण यत् कर्मार्जितम्, तं निहतरागद्वेषः पूर्वकोट्या क्षपयति। उपशान्तकषायोऽपि पुनरनन्तं प्रतिपातं लभते, अतो न स्तोकेऽपि कषायशेषे

विश्वसनीयम्। कषायेषु क्षीणेषु क्षेमम्, जितेषु जितम्, अभिहतेष्वभयम्, नष्टेषु चाविनष्टं सुखं जानीहि।

सम्यक्त्वे दृढतरं यतितव्यम्। मरण-समुद्घातेन हि मिथ्यात्वं नीयतेऽवशा जीवाः। यो मरणकाले न मुह्यति, स ह्याराधको मुनिः। अतस्तथा वर्तध्वम्, यथा गर्भवासवसति-मरण-पुनर्भव-जन्म-दुर्गतिविनिपातगमनेभ्यो मोक्षो भवेदिति।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः

कर्मारिशून्यनेत्रे वैक्रमेऽब्दे श्रीशङ्खेश्वर-पार्श्वनाथजैनसङ्घे श्रीआदि-सीमन्धरजिन-प्रसादतः समा-वडोदरापुरे सम्पन्न इति शम्।

## ◆ નવલા નજરાણા ◆

(૧) **તત્ત્વપ્રેમ** → પ.પૂ.શ્રીહરિભદ્રસૂરિ મહારાજા કૃત **યોગબિંદુ** ગ્રંથ પર નવનિર્મિત સંસ્કૃત શ્લોકવાર્ત્તિક.

(૨) **અધ્યાત્મદર્શના** → **મહોપનિષદ્** નામના પ્રાચીન હિંદુ ગ્રંથની નવનિર્મિત સંસ્કૃત ટીકા.

(૩) **સુધોપનિષદ્** → મહો. શ્રીયશોવિજયજી કૃત **વૈરાગ્યકલ્પલતા**-અંતર્ગત '**સમાધિસુધા**' પર નવનિર્મિત સંસ્કૃત ટીકા.

(૪) **શ્રુતમહાપૂજનમ્** → દ્વાદશાંગી સહિત ૮૪ આગમો તથા ૧૦૮ શાસ્ત્રોનું વિધિસહિત પૂજન.

(૫) **ત્રિપદીશતકમ્** → મહો. શ્રીયશોવિજયજી કૃત **અધ્યાત્મસાર** આદિ ગ્રંથો પર પ્રવચનો.

(૬) **પ્રવચનસૂત્રોપનિષદ્** → અષ્ટપ્રવચનમાતા વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૭) **આશાતનોપનિષદ્** → ગુરુ -૩૩ આશાતના વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૮) **તરંગલોલા સમાસ** → પ.પૂ. શ્રીપાદલિપ્તાચાર્ય કૃત **તરંગલોલા** કથાનો નવનિર્મિત સંક્ષિપ્ત સંસ્કૃત ગદ્યાનુવાદ.

(૯) **યોગોપનિષદ્** → ૩૨ યોગસંગ્રહ વિષયક નવનિર્મિત સંસ્કૃત કૃતિ.

(૧૦) **સંદર્ભસંચય** → લગભગ ૩૦૦ પુસ્તકોમાંથી પસાર થઈને વીણેલા મોતીઓ.

(૧૧) **અનુભૂતિગીતા** → આનંદઘનની આત્માનુભૂતિ કળશ કાવ્ય સંચય.


## PLEASE PLEASE PLEASE

## DON'T MISS IT




**પુનઃ પુનઃ પરિશીલનીય ગ્રંથ**

જીવનને મંગલ અને
મૃત્યુને મહોત્સવ બનાવતો ગ્રંથ





શું હજી સુધી નથી વાંચ્યો?
આ તો ફરી ફરી વાંચવા જેવો છે.

પરમ પાવન અવસરે
ગુરુ દીસે ભગવાન।
પામે તે ભગવાનને
ખુદ બને ભગવાન॥

- અનુભૂતિગીતા

# *Don't Miss it.*




मूलकाराः

अज्ञातप्राचीनमहर्षयः

टीकाकाराः

आ. श्रीकल्याणबोधिसूरयः

## ❦ લાભાર્થી ❦

# શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ

એમરલ્ડ એપાર્ટમેન્ટ,
અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરી ભૂરી અનુમોદના

૧૩૫